# yogaviShayaH

# યોગવિષયઃ

## Document Information

Text title : yogavishaya

File name : yogavishaya.itx

Category : yoga

Location : doc_yoga

Author : Guru Matsyendranaatha

Transliterated by : Mike Magee ac70 at cityscape.co.uk

Proofread by : Mike Magee ac70 at cityscape.co.uk, Shankara

Latest update : October 20, 1998, April 25, 2015

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

# યોગવિષયઃ

ગુરુશ્ચ ગુરુપુત્રશ્ચ યે ચાન્યે ગુરુબાન્ધવાઃ ।
અન્યેષાઞ્ચ ક્રમાજ્જ્યેષ્ઠાસ્તેષાં પાદૌ નમામ્યહમ્ ॥ ૧॥

યાદૃશી ? ભાવનાતીતં તં ગુરું પ્રણમામ્યહમ્ ।
ભ્રાન્તશ્ચ ભ્રમતે લોકો નિર્ભ્રાન્તઃ કૃતનિશ્ચયઃ ॥ ૨॥

તસ્ય સિધ્યન્તિ પુરુષા આદિનાથે વ્યવસ્થિતાઃ ।
કુલજાતિસમાયુક્તઃ સુચરિત્રગુણાન્વિતઃ ॥ ૩॥

ગુરુભક્તિયુતો ધીમાન્ સ શિષ્ય ઇતિ કથ્યતે ।
અકુલેનાદિનાથેન કેજાપૂપીનવાસિના ॥ ૪॥

કૃપયૈવ પરં તત્ત્વં મીનનાથોઽપિ બોધિતઃ ।
મીનનાથોઽપિ સચ્છિષ્યં પ્રત્યુવાચ સમાહિતઃ ॥ ૫॥

ત્વં ગુરુસ્ત્વઞ્ચ શિષ્યશ્ચ શિષ્યસ્ય ચ ગુરોરપિ ।
નાનયોરપિ ભેદોઽત્ર સમસિદ્ધિઃ પ્રજાયતે ॥ ૬॥

ઉમાશઙ્કરપુત્રોઽહં મીનનાથો મુનીશ્વરઃ ।
કથયામિ પરં તત્ત્વં કુલાકુલવિબોધકમ્ ॥ ૭॥

આધારઃ સ્વાધિષ્ઠાનઞ્ચ મણિપૂરમનાહતમ્ ।
વિશુદ્ધિરાજ્ઞા કૌલાનિ ષટ્ ચક્રાણિ શુભાનિ ચ ॥ ૮॥

આધારશ્ચ ગુદે તસ્થૌ સ્વાધિષ્ઠાનઞ્ચ લિઙ્ગકે ।
મણિપૂરં નાભિગતં હૃદયે ચાપ્યનાહતમ્ ॥ ૯॥

વિશુદ્ધિઃ કણ્ઠદેશે ચ આજ્ઞાચક્રં ભ્રુવોર્મુખમ્ ।
ચક્રભેદમિતિ જ્ઞાત્વા ચક્રાતીતં નિરઞ્જનમ્ ॥ ૧૦॥

ઇડા વહતિ વામે ચ પિઙ્ગલા વહતિ દક્ષિણે ।
ઇડાપિઙ્ગલયોર્મધ્યે સુષુમ્ના સુખરૂપિણી ॥ ૧૧॥

આધારે લિઙ્ગનાભૌ હૃદયસરસિજે તાલુમૂલે લલાટે ।
દ્વે પત્રે ષોડશારે દ્વિદશદશદલે દ્વાદશાર્ધે ચતુષ્કે
નાસાન્તે બાલમધ્યે ડફકઠસહિતે કણ્ઠદેશે સ્વરાણામ્
હં ક્ષં તત્ત્વાર્થયુક્તં સકલદલગતં વર્ણરૂપં નમામિ ॥ ૧૨॥

પ્રાણોઽપાનઃ સમાનશ્ચ ઉદાનો વ્યાન એવ ચ ।
પઞ્ચકર્મેન્દ્રિયૈર્યુક્તાઃ ક્રિયાશક્તિસમુધતાઃ ॥ ૧૩॥

નાગઃ કૂર્મશ્ચ કૃકરો દેવદત્તો ધનઞ્જયઃ ।
પઞ્ચજ્ઞાનેન્દ્રિયૈર્યુક્તાઃ બુદ્ધિશક્તિસમન્વિતાઃ ॥ ૧૪॥

પાવકશ્શક્તિમધ્યસ્થો નાભિચક્રે રવિઃ સ્થિતઃ ।
બન્ધમુદ્રા કૃતાસ્સર્વે નાસાગ્રે તુ સુલોચનમ્ ॥ ૧૫॥

અકારો વહ્નિદેશે ચ ઉકારો હૃદિ સંસ્થિતઃ ।
મકારશ્ચઃ ભ્રુવોર્મધ્યે વચનાચ્ચ નિબોધયેત્ ॥ ૧૬॥

બ્રહ્મગ્રન્થિરધષ્કારે વિષ્ણુગ્રન્થિર્હૃદિ સ્થિતઃ ।
રુદ્રગ્રન્થિર્ભ્રુવોર્મધ્યે વિમુચ્યન્તે ત્રયસ્તથા ॥ ૧૭॥

અકારો બ્રહ્મ ઇત્યાહુઃ ઉકારો વિષ્ણુરુચ્યતે ।
મકારો ચ શિવં સાક્ષાચ્છાન્તેશ્શાન્તતરં પરમ્ ॥ ૧૮॥

કણ્ઠસઙ્કોચનં કૃત્વા દ્વે નાડ્યૌ સ્તમ્ભયેદ્ દૃઢમ્ ।
રસના પિડ્યમાના તુ ષોડશશ્ચોર્ધ્વગામિની ॥ ૧૯॥

ત્રિકૂટં ત્રિહઠં ચૈવ કોલ્હાટં શિખરં તથા ।
ત્રિશિખં વજ્રમોઙ્કાર મૂર્ધ્વનાસં ભ્રુવોર્મુખમ્ ॥ ૨૦॥

આકુઞ્ચયેદ્રવિઞ્ચૈવ પશ્ચાન્નાડી પ્રવર્તતે ।
ભેદે ત્રિહઠસઙ્ઘટ્ટમુભયોશ્શશિદર્શનમ્ ॥ ૨૧॥

પ્રણવા ગુદનાલા ચ નલિની સર્પિણી તથા ।
બઙ્કુનાલિ ક્ષયા શૌરી કુણ્ડલી કુણ્ડલાઃ સ્મૃતાઃ ॥ ૨૨॥

કુણ્ડલીં ચાલયેત્ પ્રાણો ભેદિતે શશિમણ્ડલે । var કુણ્ડલી ચાલયેત્ પ્રાણાન્
સિધ્યન્તિ વજ્રગુમ્ફાનિ નવ દ્વારાણિ બન્ધયેત્ ॥ ૨૩॥

સુમનઃ પાવનારૂઢઃ સ ગાઢં નિર્ગુણસ્તથા ।
બ્રહ્મસ્થાનનિનાદેન શઙ્ખિન્યામૃતવર્ષિણી ॥ ૨૪॥

ષટ્ચક્રમણ્ડલોદ્ધારં જ્ઞાનદીપં પ્રકાશયેત્ ।
સર્વેષાં સ્નાપનં દેહે ક્રિયતે દેવતાર્ચનમ્ ॥ ૨૫॥

ચન્દ્રામૃતેન ચિદ્રૂપમીશ્વરં સ્નાપ્ય ભક્તિતઃ ।
મનઃપુષ્પં તથા દેયમર્ચતેત્પરમં શિવમ્ ॥ ૨૬॥

આત્મરૂપં તમાલોક્ય જ્ઞાનરૂપં નિરામયમ્ ।
દૃશ્યતે દેહરૂપેણ સર્વવ્યાપી નિરઞ્જનઃ ॥ ૨૭॥

હંસ હંસ પદે વાક્યં પ્રાણિનાં દેહમાશ્રિતઃ ।
સમ્પ્રાણાપાનયોર્ગ્રન્થિરૂપે ? ઽત્યભિધીયતે ॥ ૨૮॥

સહસ્રમેકઞ્ચ યુતં ષટ્છતં ચૈવ સર્વદા ।
ઉચ્ચારપદતો હંસઃ સોઽહમિત્યભિધીયતે ॥ ૨૯॥

પૂર્વભાગે અધો લિઙ્ગં શઙ્ખિન્યાં ચૈવ પશ્ચિમમ્ ।
જ્યોતિર્લિઙ્ગં ભ્રુવોર્મધ્યે રક્તશુક્લાત્મકં શિવમ્ ॥ ૩૦॥

પૂર્વપશ્ચિમદિગ્ભાગે વજ્રદણ્ડે વ્યવસ્થિતે ।
દ્વૌ ષષ્ટિભોગિની સ્થાનં પશ્ચાલ્લિઙ્ગં પ્રકાશયેત્ ॥ ૩૧॥

શીતાશીતં પરં સ્થાનં મેદોમજ્જાભિપૂરિતમ્ ।
સ્રવતિ બ્રહ્મણઃ સ્થાનાત્ સિઞ્ચતે ભુવનત્રયમ્ ॥ ૩૨॥

સર્વવ્યાધિક્રિયાકર્મ વાતપિત્તસમન્વિતમ્ ।
દશાષ્ટદોષરહિતં મીનનાથેન કથ્યતે ॥ ૩૩॥

॥ ઇતિ મત્સ્યેન્દ્રનાથવિરચિતં ભક્તિસં ? સમ્પૂર્ણમ્ ॥

Encoded and proofread by Mike Magee ac70 at cityscape.co.uk
Proofread by Shankara

*yogaviShayaH*
pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*